BIHAR SHODH SAMAAGAM
Multidisciplinary, Multi-Lingual, Peer Reviewed Open Access Journal
issn : 3048-6971
Vol. 3, Issue 2, April-June, 2025
Available online : https://www.biharshodhsamaagam.com/

# भारतीयदर्शने शब्दप्रमाणम्

डॉ0 मधु माला सिन्हा
अतिथि व्याख्यता संस्कृत विभाग
सुन्दरवती महिला महाविद्यालय, भागलपुर
ति0 माँ0 वि0 वि0 भागलपुर, बिहार

**प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि।**

***Abstract***

शब्देन अर्थप्रतितिः भवति।शब्देन लोकव्यवहारः प्रचलति।सर्वानि शास्तत्राण्यपि शब्दमयान्येव सन्ति।अतः सम्यक् महर्षिणा उक्तम् यास्केन- “व्याप्ति शब्दस्य अणीयस्त्वाच्च शब्देन संज्ञाकरणं वयवहारार्थम् लोके “ अतएव न्यायसूत्रकारेण गौतमेन शब्दस्य पृथक् प्रमाण्यम् स्वीकृत्य चतुर्विधानि प्रमाणानि -प्रत्यक्षः ,अनुमानः, उपमानः, शब्दः यत् शब्दप्रमाणम् यत्र स्वीकृतम्, तन्मते लोकव्यवहारः तु सुगमा। शब्दप्रमाणम् विषये वैशेषीकाणां मतम् इदमस्ति- शब्दः प्रमाणं, इत्यस्य तात्पर्यम् इदं नास्ति यत् शब्दश्रवणेन प्रमा न उदेति,न वा प्रमाजजने शब्दस्यानुपयोगित्वम्,अपितु शब्दश्रवणेन या प्रमोत्पद्यते सा प्रत्यक्षप्रमाविजातीया प्रमा भवति इत्याशयः।शब्देन यथार्थबोधे उदेति। यर्थाबोधात्मकप्रमाजनकत्वात् शब्दः प्रमाणम्। पदपदार्थयोः शक्तिरुपः संबंध सहकारी अर्थात् पदज्ञानोत्तरशक्तिज्ञानजन्यपदोर्थोस्थितद्वारेण शब्दबोधरुपं फलं भवति।शब्दवोधे पदजन्यपदार्थोपस्थिति व्यापार तदभावे घटादिपदात् आकाशस्यपि शब्दबोधापत्तिः स्यात्। वस्तुतः शब्दस्य शक्ति अभिधा एव। लक्षणापि शक्यसंबन्धरुपा शक्यार्थशक्तिः न शब्दशक्तिः शब्दे तु सा आरोपिता भवति।प्रत्यक्षमेव मूलभूतं प्रमाणम्।शब्दस्तु प्रत्यक्षगृहीतार्थस्य अनुवादक एव।यः कश्चित् शब्दं श्रत्वा व्यवहर्ता सः एवं जानाति यत् शब्देन यो बोधस्तस्य जायते सः प्रत्यक्षमूलकत्वात् यथार्थ एव।शब्दस्य सार्थकता प्रसाध्य चार्वाकमतानुयायिनः अपि शब्दव्यवहारमुपपाद्यन्ति।

अत्र शब्दस्य पृथक प्रमाणत्वेनोल्लेखः नयेऽस्मिन सर्वथा स्वीकृतः इत्याभति। किन्तु सर्वत्र शब्दप्रामाण्यं सर्वेः न स्वीक्रियते। लोकायतिकास्तावत्प्रत्यक्षमेव प्रमाणं स्वीकुर्वन्ति। बौद्ध वैशेषिकदर्शनयोः प्रत्यक्षानुमाने प्रमाणे स्तः। एतेषां मतेषु शब्दस्य प्रमाण्यं न स्वीक्रियते। न्यायसाङ्ख्यमीमांसावेदान्तशास्त्रेषु आचार्यैःशब्दस्य पृथक प्रमाण्यं स्वीकृतम्।

इदमत्र विचारणीयं यत् शब्दस्य प्रामाण्यं यत्र स्वीकृतं, तन्मते लोकयात्रा तु सुगमा, किन्तु यत्र तन्न स्वीकृतं, तदनुयायिनां का गतिः ? तेषां लोकयात्रां कथं प्रवर्त्तेत? यतो हि शब्दों यदि प्रमाणं न, शब्दे यदि प्रमाजननसामर्थ्यं यदि न, भवेत् तर्हि शब्दप्रयोगस्य सार्थक्यमेव किम् ? शब्दे श्रुतेऽपि यदि न काप्युपलब्धिः तदा शब्दश्रवणे का रूचिः ? तेन शब्दोच्चारणं शब्द श्रवणं च द्वयमपि निरर्थकं स्यात् । अशब्दोंऽयं लोको भवेत्। शब्दप्रमाणाण्यं स्वीकुर्वतां शब्दजन्यों लोकव्यवहारों लुप्येत।

अत्र चार्वाकमतनुयायिनामेवं समाधानं भवति । शब्दः प्रमाणं न इत्यस्य अयमाशयों नास्ति यत् शब्देन कस्याप्यर्थस्य प्रमात्वं न तिष्ठति, अपितु शब्दस्याप्रामाण्ये अयमाशयोऽस्ति यत् शब्देन एवमर्थो न सिद्धयति यः प्रत्येक्षण न सिद्धयेत्। अत एव प्रत्यक्षमेव मूलभूतं प्रमाणम्। शब्दस्तु प्रत्यक्षगृहीतार्थस्य अनुवादक एव। यः कश्चित् शब्दं श्रत्वा व्यवहरति स एवं जानाति यत् शब्देन यो बोधस्तस्य जायते स प्रत्यक्षमूलकत्वात् यथार्थ एव। एवं शब्दस्य सार्थकत्वं प्रसाध्य चार्वाकमतानुयायिनोऽपि शब्दव्यवहारमुपपादयन्ति।

एतद्विषये सुगतमतावलम्बिनां मतमेवमस्ति - तन्मते द्वे प्रमाणेः प्रत्यक्ष अनुमानञ्च। तत्र द्वयोरनयोः स्वीकारे कारणमस्ति यत् द्वौ पदार्थोः- विशेषः सामान्यञ्च। तत्र प्रथमं स्वलक्षणं क्षणिकं भावात्मकं व्यक्ति, अपरञ्च सामान्यम् अतद्व्यावृत्तिलक्षणम् अपोहूपम्। तत्र प्रत्यक्षेण स्वलक्षणं गृह्यते अनुमानेन अपोहः। अतः एवं प्रत्यक्षानुमाने तेषां मते स्वीकृतिं भजेते। शब्दस्तु प्रत्यक्षानुमानगृहीतस्यार्थस्य अनुवादक


@2025 Bihar Shodh Samaagam

एव, न तु पृथक् प्रमाणम् शब्दव्यवहारे लोकानां प्रवृत्तौ प्रत्यक्षानुमानमूलकत्वात् शब्दबोधस्य याथार्थ्यं कारणं भवति। एवं तेषां शब्दमूलको लोकव्यवहार उपपद्यते।

अत्र वैशिषिकाणां मतम् इदमस्ति - 'शब्दः प्रमाणं न ', इत्यस्य तात्पर्यम् इदं नास्ति यत् शब्दश्रवणेन प्रमा न उदेति, न वा प्रमाजनने शब्दस्यानुपयोगित्वम, अपितु शब्दश्रवणेन या प्रमोत्पद्यते सा प्रत्यक्षप्रमाविजातीया प्रमा न भवति न वा अनुमतिप्रमा विजातीया प्रमा भवति इत्याशयः। शब्दः कदाचित् स्वीयार्थं स्मरेणेन तदर्थग्राहकालौकिकसन्निकर्षजन्यप्रत्यक्षप्रमायाः जनने प्रयोजको भवति, कदाचित् स्वीयार्थविषयकानुमतिप्रमायाः जनने प्रयोजको भवति। अनुमितिप्रमाजनने द्विघा प्रयोजको भवति कदाचित पक्षः सन् कदाचितलिगंम्।

शब्दः यदा पक्षःसन् अनुमितौ प्रयोजकः तदा अनुमानस्वरूपम् - शब्दः अर्थानां परस्परसर्गज्ञानप्रयुक्तः परस्परसाकांक्षन्वययोग्यसन्निहितत्वात्। यः यः परस्परसाकाक्षंान्वययोग्यसन्निहितः स स स्वीयार्थसंसर्गज्ञानप्रयुक्त। अत्र अनुमितौ शब्दः पक्षः अर्थानां परस्परसंसर्गः साध्यः अनुमेयों भवति।

यदा शब्द लिंगसन्अनुमितिं जनयति तदा अनुमानस्वरूपम् - अर्थ परस्परसम्बद्वः परस्परसाकांक्षन्वययोग्य।परस्परसन्निहितशब्दोपस्थाप्यत्वात्। अत्र अनुमितौ शब्दोपस्थाप्यः अर्थः पक्षः अर्थोपस्थापकः शब्दः हेतुः अतः स्थाप्यः अर्थः पक्षः अर्थोपस्थापकः शब्दः हेतुः अतः शब्दपक्षकेण अर्थपक्षकेण च अनुमानेन शब्दबोध उपपद्यते। तस्मात् शब्दश्रवणानन्तरं लोकव्यवहारो भवति। अतएव शब्दस्य विजातीय प्रमाण्यास्वीकारेऽपि शब्द उपयुज्यते।

एवं शब्द प्रमाणास्वीकारेऽपि शब्दमूलको लोकव्यवहारः सिद्धयति।

**किन्तु एतद्विषये परैः याः युक्तयः दर्शिताः**

तत्र नैयामिकैरवं समीक्ष्यते-चार्वाक बौद्वमतयोरपि लोकव्यवहाराय शब्दे यथाबोधः स्वीक्रियते एवं तर्हि 'शब्द अप्रमाणम् ' इति मतं न समीचीनम्। शब्द प्रमाणान्तरानवगतप्रमाजनको न भवतीति न प्रमाणमिति न युक्तिसहम्। शब्दोपस्थापितार्थस्य प्रमाणान्तरावगतत्वेऽपि शब्दानां परस्परासम्भवबन्धस्य विजातीयप्रमाणत्वात्। अत्र पुनः शब्दैरूपस्यापितान् ततदर्थानां परस्परसम्बोधोऽपि । प्रमाणन्तरेण वक्त्रा विदित एवं अन्यथा शब्दोच्चारणस्य वैयर्थ्यं स्यात् इत्यपिन समीचीनम्। शब्दों न भवतु वक्त्रे प्रमाणं श्रोत्रे तु भवत्येव। यतोहि शब्दाथर्योः परस्परसम्बन्धः शब्देन बुबोधयिष्यते। स सम्बन्ध तु श्रोत्रा अविदित एव। तदा पुनः शब्दः श्रोत्रे एवं प्रमाणं न वक्त्रे इति चेत् तन्न। वक्ता कदाचित श्रोताऽपि भवति । एवं वक्तुः श्रोतृत्वे तदर्थं पुनः शब्दः प्रमाणम्। अनेन शब्दः सदैव सर्वेषांकृते न प्रमाणम् इत्यतः। शब्दः अप्रमाणमेंव इति चेत्तर्हि प्रत्यक्षमपि अप्रमाणं स्यात्। यतोहि प्रत्यक्षमपि सर्वर्षां सदैव प्रमाणं न भवति यथा घटे दृष्टे पुनः चक्षुषा घटदर्शने चक्षुः तत्कृते प्रमाणं न स्यात् ं एवमेव निमीलितचक्षुष्कस्य करस्पर्शेन घटज्ञाने जाते उन्तीलितेन चक्षुषा। घटदर्शने प्रत्यक्षं न स्पेर्शेन पूर्वविदितत्वात्।

अतः शब्देन यथार्थबोध उदेति। यर्थाबोधात्मकप्रमाजनकत्वात् शब्दः प्रमाणम्। एवं चावार्कबौद्वमतमयास्तम् वैशेषिकाणां मते अनुमानाङगत्वात् शब्दस्य अप्रमाण्ये स्वीकृतम्। किन्तु शब्दस्य नानुमाङगतवम्। शब्दश्रवणनन्तरं शब्दोपस्थाप्य तदर्थ परस्परसंसंर्गः यदि अनुमीयते तिर्हि। शब्दानुपस्थाप्योऽपि संसर्गः इतरलिङेगेन भासेत । किन्तु तादृशस्य बोधस्य अनुभवों नैव जायते । अतः शब्दश्रवणानन्तरं शब्दोपस्थाप्यार्थानां परस्परसंसर्गबोधस्य विजातीय। प्रमात्वात् शब्दः प्रमाणमिति निश्चितम्।

**यथोक्तं जगदीशेन शब्द शक्तिप्रकाशिकायाम्:-**

साकाङक्षशब्दै र्यो बोधस्तदर्थान्वयगोचारः ।
सोऽयं नियत्रितार्थत्वात् न प्रत्यक्षं न चानुमा।।
योग्यतार्थगता काङक्षा शब्द निष्ठानुभाविका।
प्रत्येक वा मिलित्वा वा नैते लिङ्गमसिद्धितः।।

**शब्द स्वरूपम:-**



@2025 Bihar Shodh Samaagam

‘ ‘शब्दः कः ‘ इति जिज्ञासायामुक्तम् अप्रवाक्यं शब्दः। आप्तुस्त यथाभूतस्य अर्थस्य उपदेष्टा पुरूषः । वाक्यंतावत्साकाङःक्षन्वययोग्यसन्निहितपदानां समूहः । यथा स्वर्गकामो यतेज देवदत्तस्य पुत्रो जातः इत्यादि। यद्यपि न च पदानि (शब्दाः) साकाङक्षणि न वा अर्थाः साकाङ्क्षा। आकांक्षा तु इच्छारूपत्वात चेतनधर्मः। पदाणि अर्थश्च स्वयमचेतनाः। तर्हि कथं साकाङाणि पदानि साकाङक्षाः वा अर्थाः स्युः ? अस्तु। अर्थास्तु स्वपदश्रोतरि अन्योऽन्यविषयाकाङक्षजनकत्वेन साकाङक्षाः। तद्द्वारेण पदानि अपि उपचारत् साकाङ्क्षणि भवन्ति।

शब्दबोधप्रक्रिया:-

शब्दबोधप्रक्रियां प्रदर्शयन विश्वनाथः कारिकावल्यां कथयति -

पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः।

शाब्दबोधःफल तत्र शक्तिघीः सहकारिणी ।।

शाब्दबोधे पदज्ञानं करणं भवति, पदजन्यपदार्थोपस्थितिः व्यापारः।

पदपदार्थयोः शक्तिरूपः सम्बन्धः सहकारी। अर्थात् पदज्ञानोत्तरशक्तिज्ञानजन्यपदार्थोस्थितद्वारेण शब्दबोधरूपं फलं भवति। अ़त्रापि ज्ञायमानं पदं न करणम् अपितु पदज्ञानमेव करणम्।

पदाभावेऽपि यत्र लेखादिना शाब्दबोधो भवत्येव किन्तु तत्र ज्ञायमानं पदं न तिष्ठति। अतः ज्ञायमानं पदं न करणम्

पदार्थघीरित्यस्य पदजन्यपदार्थस्मरणम् अर्थःं स एवात्र व्यापारःं यदि पदजन्यपदार्थस्मरणं व्यापारों न स्यात्, तदा पदज्ञाने प्रत्यक्षादिना पदार्थोपरिस्थतौ शाब्दबोधापत्तिः स्यात्।

शब्दबोधे पदजन्यपदार्थोपस्थितिः व्यापारः तत्रापि शक्तिलक्षणान्यतरवृतिरूपसम्बन्धेनैव पदजन्यपदार्थोपत्तिः व्यापारः। तद्भावे घटादिपदात् आकाशस्यपि शाब्दबोधापत्तिः स्यात्। यथा घटादिपदं समवायसम्बन्धेन आकाशे तिष्ठति घटादिपदात् समवायसम्बन्धेन आकाशे स्मरणे जाते आकाशस्यापि शाब्दबोधापत्तिः स्यादेव। अतः पदपदार्थयोः शक्तिलक्षणान्यन्तरवृत्तिरूपः सम्बन्धः एव न्याय्यः शक्तिलक्षणान्यतरवृत्तिरूपसम्बन्धेन आकाशस्मरणासम्भवात्। सक्षेपतः शाबदबोधकारणसामग्रीः- यथा।

1. पदज्ञानम् 2. वृत्तिज्ञानम् (पदपदार्थसम्बन्धज्ञानम्)

3 पदार्थस्मरणम् 4 आकाङक्षज्ञानम्

5 योग्यताज्ञानम् 6 सन्निधिज्ञानम्

7 तात्पर्याज्ञानम् च

पदपदार्थयोः सम्बन्ध

पदपदार्थयोः वृत्तिरूपसम्बन्धज्ञानं शाब्दबोधे अन्यतमं कारणमस्ति । पदपदार्थयोः सम्बन्धेनैव नियतपदेन नियतार्थस्य बोधो भवति, अन्यथा येन केनापि पदेन यस्य कस्याप्यर्थस्य बोधापत्तिः स्यात्। अत एवं पदपदार्थयोः सम्बधः अनिवार्यो भवति। स सम्बन्ध किंरूप इति जिज्ञासायां वैयाकरणानामालङकरिकाणां मतम् एवमस्ति। पदपदार्थयोः स सम्बन्धः तादात्म्यरूपः - स च भेदसहकृतः अभेदः अर्थात् अर्थः शब्दात् भिन्नोऽपि वत्तर्ते अभिन्नोऽपि । अर्थस्य भिन्नाभिन्नरूपत्वादेव तत्तत्पदेन तत्तदर्थस्य बोधो जायते। यथोक्तं कालिदासेन -

‘ ‘बागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ। ‘ ‘

मीमांसकानां मतम्:- पदपदार्थयो: सम्बन्घः वाच्यवाचकभावरूपः स एव वाचकता वाच्यता अभिधाऽपि कथ्यते। अनेनैव शब्दो वाचकः अर्थश्च वाच्यः कथ्यतें अनेनापि नियतपादेन नियतार्थस्य बोध उपपद्यते।

नैयायिकानां मतम् - पदपदार्थयोः सम्बन्धः संकेतरूपः ।

सच अस्मात् पदात् अयमर्थो बोद्धव्यंः अथवा ईदं पदम् अर्थम बोधयतु इति ईश्वरेच्छारूपः।ं आधुनिकसङेकते न शक्तिः इति प्राचां मतम्। नव्यास्तु इच्छामात्रमेव शक्तिस्वीकुर्वन्ति, न केवलमीश्वरेच्छाम। अत एवं आधुनिक सङकतेऽपि शक्तिः अस्त्येव। एतेषु मतेषु पूर्वोक्ते द्वे सर्वथा

शास्त्रीये लोकानुभवपराऽमुख्ोा स्तः। नैयायिकमतं शास्त्रीयं सदापि लोकानुभवं निर्वहति। अत एवं प्रशस्यतरं प्रतिभाति। शब्दार्थयोः अयं सम्बंधः स्वाभाविकः अभिधाऽपि कथ्यते सामान्यतया अनयैव शक्तया व्यवहारो भवति। किन्तु कदाचित् गंगायं घोषः इत्यादिस्थले अनया कार्यं न प्रचलित । यथा अभिधया गंगायंा घोषः इत्यादिस्थले अनया कार्यं न प्रचलति। यथा अभिघया गंगापदं प्रवाहरूपम् अर्थं बोधयति, तत्र घोषस्य आभीरपल्लीत्यस्य असम्भवात् शक्यसम्बन्धेन तीराद्यर्थबोध जायते। इयमेव शक्यसम्बंध रूपा लक्षणा कथ्यते। अत एव नैयायिकानां मते द्वे एव पदपदार्थसम्बन्धरूपे वृत्ती-शक्तिः लक्षणा च।

केचित् शक्तिलक्षणातिरिक्तां व्यञ्जनामपि पदपदार्थसम्बन्धरूपेण स्वीकुर्वन्ति। तेषं मते कदाचित् शब्देन् एताद्दशस्यापि अर्थस्य बोधो भवति, यस्य बोधः शक्तिलक्षणाभ्यामसम्भव एवं । यथा गंगायां घोषः इत्यत्र शाक्त्या गंगापदस्य प्रवाहरूपे अर्थबोधे जाते तत्र घोषासम्भवात् लक्षणया तदरूपार्थबोधः तत्र तटे पुनः शैत्यपावनत्वादिरूपः। अर्थः यः भासते तदर्थ व्यञ्जनारूपः सम्बधः कल्पयते। यतो हि शैतयपावनत्वादिरूपस्य अर्थस्य बोधः शक्तिलक्षणाभ्यां न सम्भवति । गंगापदं शैत्यपावनत्वाद्यर्थबोधे अशक्यम् गंगापदस्य तत्र सङक्ेताभावात् एवं शैत्यपावनत्वाद्यार्थेन सह गंगापदस्य शक्यसम्बन्धोऽपि लक्षणात्मकः न सम्भवति, लक्षणया तदर्थबोधे किमपि प्रयोजनमपि नास्ति। प्रायोजनं बिना लाक्षणिकार्थबोधो न स्वीक्रियते। अत एवं एतर्द्थबोधनाय व्यंजना स्वीकार्या। केचित् चतुर्थ तात्पर्याख्यं सम्बन्धमपि पदपदार्थयोः कल्पयन्ति। तेषां मते पदानि स्वार्थान् प्रस्तूय विरमन्ति, तदनु तेषां परस्परान्वयसहकृतेन वाक्येन योऽर्थबोधो जायते तत्र अभिधया अक्षमत्वात् समुदितार्थवाक्यार्थबोधने तात्पर्याख्या वृत्तिः स्वीकार्या भवति।

न्यायनये द्वे एव वृत्ती अभिधा लक्षणा च । वस्तुतः शब्दस्य शक्तिः अभिधा एव। लक्षणापि शक्यसम्बन्धरूपा शक्यार्थशक्तिः न शब्दशक्तिः शब्दे तु सा आरोपिता भवति। यथोक्त मम्मटेनापि -

'सान्तरार्थनिष्ठः आरोपितः शब्दव्यापारः इति।

**शक्यार्थचिन्तनम्ः-**

अर्थेन यह शब्दस्य सहजः स्वाभाविकः सम्बधः शक्तिरूच्यते। तेन सम्बन्धेनैव तततपदेन तत्तदर्थ बोध इति नियमः। इदानीं पुनः इदं तावद् विचारणीयं यत् शब्दः तच्छक्तिद्वारेण कम् अर्थ बोधयति ? अर्थात् शक्यार्थः कः? येन सह शब्दस्य शक्तिसम्बन्धस्वीकार आवश्यकः। अत्र नैयायिकानां मतम् शब्दोच्चारणानन्तरं श्रोतुः येषामार्थनां बोधः सर्वानुभवसिद्धः ते सर्वेऽपि अर्थाः शक्याः। यथा गोशब्दोच्चारणानन्तरं श्रोतुः गोत्वजातेः सास्नादिमत्तवाकारस्य पशुविशेषव्यक्तेश्च बोधो जायते। अत एव जातिः आकारः व्यक्तिश्च सर्वे गोपदशक्याः । ''यथाह सूत्रकारः जात्याकृतिव्यक्तयः पदार्थः। ' ' यथा 'गौः न हन्तव्यः ' इत्यत्र गोत्वजातिविशिष्टपशुविशेषमात्रस्य जातिरूपस्य ग्रहणम् यथा कश्चित् कुम्भकारम् आदिशति 'गां कुरू ' स कुम्भाकारः गवाकृर्ति रचयति। अनेन गोपदस्य अवाकृतिः अर्थः पुनः कश्चित्। कथयति गामानय इति अत्र गोपदस्य गोव्यक्तिः अर्थः। अत एव जातिः आकृतिः व्यक्तिश्च सर्वाःगोपदशक्याः। अत्र सूत्रे आकृतिविषये प्राचां मते नत्यमते च भेदोऽस्ति। आकृतिपदेन प्राञ्चः आकारम् अवयवसंस्थानं वा गृह्णन्ति। किन्तु नव्याः आकृतिपदेन जातिव्यक्तयोः सम्बन्धसमवायरूपं स्वीकुर्वन्ति।

किन्तु मीमांसकाः तन्मतं न स्वीकृर्वन्ति। मीमांसाकास्तु लाघवात् जातिमेव शक्यार्थं स्वीकुर्वन्ति यथा मम्मटेन तन्मतसूचनाय काव्यप्रकाशे 'जातिरेव वा ' इति निगदितम्। अतस्तन्मते जातिरेव शक्या। अत्र प्रभाकरः जातिमेव शक्यां स्वीकृत्य तुल्यवित्तिवेद्यतया व्यक्तिबोधमुपपादयति। अर्थात जातिबोधकसामग्रीग्राह्याव्यक्तिः इतिं स्वीकारोति। मम्मटस्तु शब्दशक्तिबलेन जातिबोधं स्वीकारोति, अनुमानेन व्यक्तिबोधम् उपपादयति। मण्डनमिश्रस्तु जातिबोधं शब्दशक्तया व्यक्तिबोधं च लक्षणया मनुते। अत्र श्रीकरः जातिबोधं शब्दशक्तिद्वारेण शब्दजन्यं स्वीकारोति व्यक्तिबोधं व्यक्ति विनाभावाज्जातेः इत्यनुपत्या अर्थापत्तिबलेन मन्यते। वस्तुतः मीमांसाकमतेषु अनन्यलभ्यः शब्दार्थः इत्याश्रित्य व्यक्तिबोधम् अन्यलभ्यं स्वीकृत्य जातिबोधः एवं शक्यार्थः स्वीकृतः अनन्यलभ्यत्वात्।

किन्तु 'जातौ शक्तिः न व्यक्तौ ' इतिमतं न समीचीनम् । यतो हि शब्दश्रवणानन्तरं जातिबोधः व्यक्तिबोधश्च समानकालिकौ एव। अत्र न कालभेदः न वा प्रक्रियाभेदः प्रतीतियोग्यों भवति। तर्हि कथं जातिबोधः शब्दशक्त्यं। व्यक्तिबोधश्च प्रकरान्तरेण स्यात्। जाति व्यक्तिश्च द्वयमपि शब्दशक्यम् अवगनतव्यम् अनन्यलम्यः शब्दार्थः इत्याश्रित्य यः व्यक्तिबोधम् अन्यलभ्यम् प्रयासः कृतः मीमांसकमतेषु स सर्वाऽपि

दूषित एव। यथा प्रभाकरः तुल्य वित्तिबोधताजियमेन व्यक्तिबोधमपपाद्यति। किन्तु व्यक्तिबोधरूपं कार्यं कारणपेक्षि न केवलं नियमेन कार्योत्पतिः अपितु कारणेन। मम्मटमते अनुमानेन व्यक्तिबोध उपपादितः इत्यपि न युक्तिसहम्। अनुमानबोधे वस्तुज्ञानं पक्ष रूपेण साध्यरूपेण व्याप्तिरूपेण च भवति। किन्तु व्यक्तिः एषु कुत्रापि अनुमानजन्यबोधविषयो न भवितुं शक्नोति । अनुमितौ परामर्शजन्यत्वस्य आवश्यकत्वात् शब्दश्रवणानन्तरं व्यक्तेरनुपलब्धौ कः परामर्शविषयः-स्यात्।

मण्डनमिश्रमते व्यक्तिबोधो लक्षणया स्वीकृतः । किन्तु बीजाभावात् यदा लक्षणा न भवति तदापि शब्दशक्यो व्यक्तिबोधः। यथा 'गौः ' अस्ति इत्यत्र गोत्वे अस्तित्वानुपक्तेस्भवात् गवि गोशब्दलक्षणा न स्वीकर्तुं शक्यते। अतस्तन्मते गोव्यक्तेरस्तित्वबोधो नोपपद्यते।

श्रीकरमते अयं दोषोऽस्ति - द्वाम्यां विजातीयप्रमाणाभ्यां एकज्ञानस्यानुदयात्, शब्दार्थापत्तिप्रमाणयोः मिथः माहाय्येन व्यत्तिबोधोपत्तिः असम्भवा एव ।

अत्र लोकानुभव एवं मुख्यंकारणमस्ति शब्द श्रवणानन्तरं जातिबोधे व्यक्तिबोधे च क्रमो न प्रतीयते। उभयोः सहैव बोध उदेति। येन व्यक्तिबोधस्य अन्यलभ्यत्वं न सिद्धयति। अतः अनन्यलभ्यः शब्दार्थः इत्याधारीकृत्यव्यक्तेः शब्द शक्यताया अस्वीकारों नोचितः। इति

**सन्दर्भ ग्रन्थ**


1- न्यायसूत्र गौतम मुनिकृत] न्याय दर्शन 1/1/ 15 आचार्य उदयवीर शास्त्रीकृत, विद्योदय भाष्य,विजय कुमार, गोविंद राम हंसानंद। पृष्ठ संख्या- 45

2- निरुक्त यास्ककृत हिंदी निरुक्त प्रथम अध्याय समीक्षक डॉक्टर कपिल देव शास्त्री, श्रीकांत पांडे। पृष्ठ संख्या 76,77

3- तर्कभाषा -केशव मिश्र, संपादक तारिणीश झा,प्रकाशन केंद्र रेलवे क्रॉसिंग, सीतापुर रोड, लखनऊ पृष्ठ संख्या। 19 से30 तक

4- तर्कसंग्रह। अन्यभट्ट व्याख्याकार गोविंदाचार्य प्रत्यक्ष खंड चौखंबा सुरभारती पृष्ठ संख्या 153

5- काव्यप्रकाश मम्मट विरचित व्याख्याकार श्री हरिदत्त शास्त्री, डॉक्टर श्रीनिवास शास्त्री। संपादित साहित्य भंडार ,शिक्षा साहित्य के मुद्रक एवं प्रकाशक। सुभाष नगर, मेरठ। पृष्ठ संख्या 34

6- रघुवंश कालिदासकृत व्याख्याकार डॉक्टर श्रीनिवास, डॉक्टर श्री कृष्ण मणि त्रिपाठी। चौखंबा सुरभारती प्रकाशन पृष्ठ 16





@2025 Bihar Shodh Samaagam